Barcode : 99999990173053
Title -
Author - .
Language - sanskrit
Pages - 48
Publication Year - 1936
Barcode EAN.UCC-13



BHASA KATHA SARA

भासकथासारः ॥

CONSISTING OF ABRIDGED NARRATIONS

IN SANSKRIT PROSE

OF THE STORIES OF THE TRIVANDRUM PLAYS

— ATTRIBUTED TO —

BHASA

BY

Y. MAHALINGA SASTRI, M.A., B.L.,

Lecturer in Sanskrit, Madura College, Madura.

SON OF MAHAMAHOPADHYAYA

BRAHMASRI YAJNASWAMI SASTRIGAL

of Kumbakonam.

Part II

भागत्रयात्मके द्वितीयो भागः ।

SECOND REPRINT OF THE SPECIAL EDITION.

PUBLISHED BY THE AUTHOR

All Rights Reserved]

1936

[Price Annas 8

BHASA KATHA SARA

भासकथासारः ॥

CONSISTING OF ABRIDGED NARRATIONS

IN SANSKRIT PROSE

OF THE STORIES OF THE TRIVANDRUM PLAYS

— ATTRIBUTED TO —

BHASA

BY

Y. MAHALINGA SASTRI, M.A., B.L.,

Lecturer in Sanskrit, Madura College, Madura.

SON OF MAHAMAHOPADHYAYA

BRAHMASRI YAJNASWAMI SASTRIGAL

of Kumbakonam.

Part II

भागत्रयात्मके द्वितीयो भागः ।

SECOND REPRINT OF THE SPECIAL EDITION.

PUBLISHED BY THE AUTHOR

All Rights Reserved]

1936 [Price Annas 8

PART II.

CONTENTS.

	Pages.
Summary of the Story	1—8
श्री रामचरितम् ... ... (प्रतिमाऽभिषेक नाटकयोः सारभूतम्)	... 35 to 61
भासीय श्लोकानुक्रमणिका	62

N. B.—For page-numbering, Part II is considered as contiguous to Part I as both Parts were and will in the further editions be comprised in one volume as originally published.

Madura,
19—7—36

Y. Mahalinga Sastri.

BHASA KATHA SARA

PART II.

SUMMARY OF THE STORY.

(1)

DASARATHA, of the illustrious Solar race of kings, ruled over Ayodhya for a long number of years. At the declining period of his life, he, desiring to lead a recluse's life as was the wont with his noble ancestors when grown old, made preparations for the coronation of his eldest son Ramachandra. But the actual investiture was interrupted at the critical moment by Manthara who flashed a shocking message to the king by the authority of Kaikeyi the junior queen. The kingdom was settled on the issue of Kaikeyi through the bargaining of her parents at the time of her marriage and Dasaratha was sadly helpless when the stipulation was demanded to be given effect to. The pathos of the situation was further intensified by the tenacious insistence by Kaikeyi on the banishment of Rama for fourteen years from the kingdom. Lakshmana was ablaze with wrath at such a turn of the events and was particularly incited to a spirit of desperate vengeance by the latter clause of indefensible cruelty. Dasaratha himself was protesting and struggling desperately against the injustice sought to be done to Rama. But, Rama, noble as he was, declared himself determined to carry out to the letter the command of his junior stepmother. To Sita a long separation from Rama during his exile was unthinkable, and Lakshmana's secession followed as a matter of course. The three set out for the forest amidst the pathetic groans and helpless protests of the citizens, friends, servants and the nearest kinsmen.

The terrible blow of Rama's departure, entirely shattered the faculties and the physique of the old Dasaratha already in the wane, and the farthest limit to which he managed to drag on his intolerable existence was the moment of Sumantra's return after his escorting the exiles up to the territorial boundary.

When Dasaratha passed away, Vasishta taking counsel with the ministers, sent for Bharata who from his early age had been living in the household of his uncle. The messenger was charged with saying nothing about the death of Dasaratha and Bharata was given to understand that his father was sick.

Upon reaching the outskirts of Ayodhya, Bharata was required to wait for a short while in order that the hour of an auspicious constellation might arrive. Bharata cast about to spend the interval leisurely and, descrying a temple not far off, walked into it. In the interior he found four consecrated images which were apparently fashioned on human models. When he prepared to offer his salutation and prayer to them the temple-guard suddenly intervened and said "These are Kshatriyas and as such are not to be saluted by a person like you". Upon further enquiry the guard pointed to the first three images as being those of Dilipa, Raghu and Aja, respectively, the ancestors of Bharata. When he proceeded to identify the fourth which bore a close resemblance to Dasaratha himself, Bharata required to know if statues were installed, in that house, of living monarchs also. The speedy reply of the guard to this was, "No. Statues are made only for the dead." Bharata's head reeled on his hearing this, for, he vaguely perceived that a calamitous announcement was lying in wait for him; and being unwilling to be shocked so precipitously, forbade the guard to speak further on. But the guard defiantly and relentlessly continued: "Why, sir, would you not know about this image of

Dasaratha, the king who gave up his kingdom and his life for the sake of keeping his marriage-pledge?" Bharata could not bear the crushing cruelty of this news. It was all his mother's doing and he was involved in the guilt however involuntarily and unwittingly. Another step in the conversation revealed that Rama, with Sita and Lakshmana had gone into exile to the forest. Bharata swooned and recovered, cried in despair, depreciated his luck, despised himself for being the motive of his mother's cruel avarice, and once again swooned. The temple-guard could no more be mistaken in the identity of the person whom he had so unwarily reduced to such a sad plight.

At this juncture, entered by previous appointment the bereaved ladies of the harem escorted by Sumantra in order to inspect the statue of Dasaratha newly installed in the statue house of ancestors The guard directed their attention to the plight of Bharata and retired. When Bharata was brought back to consciousness by the efforts of the ladies, a scene of pathetic confusion followed. Bharata paid his respects to Kausalya and Sumitra, but did not deign to look on the face of Kaikeyi. He rebuked her bitterly making her answerable for a number of cruelties and crimes. He rejected with contempt the offer of the crown made by Vasishta and without entering the city, directly set out to the forest to meet Rama.

Rama's hermitage was on the *Chitrakuta* mountain. Bharata supplicated himself before Rama, seeking pardon for all the sins of his mother and begged of him to accept the crown. But Rama was stern in his adherence to duty and enjoined Bharata to carry out in his turn the wishes of the departed father by taking up the sovereignty. Bharata however, being unable to acquiesce in the exhortation with a free conscience, struck a compromise by which he was to install on the throne the pair of slip-

pers worn by Rama and govern the kingdom as its servant for 14 years at the end of which period Rama was to assume sovereignty in the regular manner. Upon Rama willingly parting with the slippers in order to please his devoted brother, Bharata turned back with a conscience much laid at ease.

(2)

Sometime later, when Bharata was provoked by the tidings of Rama's adversities in the forest, to insult Kaikeyi ruthlessly for her ill-fated fatuation, she, seconded by Sumantra, appealed to him to consider the following facts in extenuation of her guilt. The banishment of Rama with its sequel of Dasaratha giving up his life out of grief, was pre-ordained by virtue of a curse of an old recluse whose only son Dasaratha had killed by mistake while hunting. In the matter of fixing the term of exile Kaikeyi had been made a mere tool by Providence, for she intended to say "14 days" but actually said "14 years". Sumantra further explained that the preceptors of the royal family, Vasishta and Vamadeva included, acquiesced in all these dispensations of Providence and were not inclined to blame anybody. After this interview Bharata cooled down considerably towards his mother and sought reconciliation with her.

Soon after sending back Bharata, Rama left the Chitrakuta and proceeding southwards entered the *Dandakaranya* celebrating the entry with the slaying of Viradha. He then visited a number of sages in their respective hermitages and ultimately fixed his residence at *Janasthana* a region which was subject to the sway of a Rakshasa named Khara.

Living there, Rama once incurred the enmity of the Rakshasas led by Khara through the wrong he did to

Surpanakha. In the battle which followed, fourteen thousand Rakshasas with the leaders Khara, Dushana and Trisiras were swiftly destroyed by Rama unaided except for his bow and arrows.

That Rama had become a great menace to the Rakshasas soon reached the ears of Ravana and the latter happening also to be swayed by a wicked motive regarding Sita of whose beauty he had heard much, resolved upon the abduction of Sita by a ruse, both as a measure of vengeance against the enemy and as a means of carrying out his own design on her. He chose his moment cleverly. Lakshmana had gone far away to welcome a sage returning from a pilgrimage. Rama was discussing with Sita about the means of celebrating in a marked way his father's annual ceremony which was coming off the very next day. Ravana entered in the guise of a Sanyasin and on being received with the customary civilities by Rama and Sita, mentioned in a casual manner his acquaintance with the *Sraddha Kalpa*. Rama eagerly enquired of him "Holy Sir, acquaint me with the most meritorious means of gratifying the departed while oblations are being offered to them. Ravana replied, "there is a race of wonderful deer on the seventh summit of the Himalayas which are all gold and emeralds all over the body, which vie with the wind in fleetness, and which drink of the Ganges water directly falling from the matted crown of Siva." And when Rama succumbed to the temptation, Ravana produced an illusion of such a deer and by this agency managed to entice Rama away from the spot.

When Rama had gone out of sight, Ravana suddenly assumed his form and carried away Sita by force in his car which coursed through the air. The heroic endeavours of Jatayu, the eagle-friend of Dasaratha to rescue Sita, merely cost him his life and availed naught else.

Rama returned after a fruitless pursuit of the deer to see the hermitage empty. Lakshmana soon joined him. Upon realising the loss he had sustaind Rama became overwhelmed with grief. He roamed about listlessly from forest to forest lamenting all the way and scarcely taking comfort from the devoted solicitude of Lakshmana.

When Rama reached Kishkindha in the course of his rambles southward. there arose an alliance between him and Sugriva the king of monkeys who was living in the Risyamuka mountain in hourly dread of Vali, his elder brother, having been dispossessed by the latter of both his kingdom and his wife. Rama slew Vali and raised Sugriva to the throne of Kishkindha. Sugriva in his turn despatched armies of monkeys to seek out Sita in all directions. Angada son of Vali and Hanuman the chief minister of Sugriva, were at the head of the party going southwards. When they reached the sea-shore they accidentally met Sampati the elder brother of Jatayu and learnt through him that Sita was lodged in Lanka on the other side of the ocean.

(3)

Hanuman the ablest of the monkeys and son of the wind-god lept over the ocean and after making a careful search in Lanka, espied Sita at the foot of a tree in the harem-garden, wretched-looking and surrounded by Rakshasis. He also witnessed a scene which passed between Sita and Ravana in which the most abject addresses of the latter were scornfully resented by the former. Hanuman, soon after, took the opportunity to announce himself to Sita. He placed in her hands the signet ring of Rama as a token for inducing confidence and giving comfort. After delivering Rama's message of love and heroic re-resolve to her, Hanuman courted a row with the Rak-

shasas in which he made havoc of vast numbers of his opponents. In the end he allowed himself to be taken captive by Indrajit in order to have an opportunity of meeting the Lord of Lanka and affronting him in person. This he did to his heart's content and for his effrontery he was punished with lighting up of his tail. In the course of his bandying words with the enemy, Hanuman was able to observe how Vibhishana, the brother of Ravana intervened in his favour, strongly protesting against the injustice of retaining Sita by force.

Soon after Hanuman had brought the news about Sita's whereabouts and the enemy's unrelenting attitude, the armies of Sugriva accompanying Rama and Lakshmana made rapid march towards the seashore and encamped there, wondering how ever they were to cross the ocean. Just at that time, Vibhishana joined the host as a suppliant at the feet of Rama, having been expelled by his brother on suspicion of disaffection and treachery. Rama forded the ocean by the grace of the Ocean God and pitched his camp on the slopes of the *Suvela* mountain in Lanka.

Then there ensued several skirmishes between the *Vanara* and *Rakshasa* hosts. Each encounter laid a heavy toll of the Rakshasas and one by one the stalwarts fell on the field. Kumbhakarna himself had been slain in battle. The genius of victory seemed to have deserted Ravana. Indrajit had sallied forth to battle to mend matters if he could. At this juncture when a sober person would have concentrated on war-policy, the ill-fated Ravana pursued the mirage of Sita with absurd infatuation. He sought to subjugate her to his will by producing before her two puppet heads resembling those of Rama and Lakshmana alleged to have been killed in battle by Indrajit. But by an irony of fate, just at that moment entered a servant breaking the calamitous news

that Indrajit had been killed by Lakshmana. Ravana on hearing this became overpowered by a tumultuous commingling of disappointment, despair, sorrow and wrath, and burst forth into the battle-field vowing that the rise of another day would see on the face of the earth either Rama or Ravana, but not both.

Then ensued the famous battle between the two heroes who had so long been mutually yearning for an eventual personal combat. After a prolonged display of skill on either side, the ten heads of Ravana were felled by Rama who used the invincible missile of *Brahmastra* The devas delighted with the removal of the terror of the universe, poured down celestial flowers on the head of victorious Ramachandra.

Rama next installed Vibhishana on the throne of Lanka. Vibhishana, eager to restore Sita to Ramachandra made his respectful submission to that effect. But Rama assumed an apparently rigourous attitude in the matter, seeming to be afflicted with doubts regarding the immaculate purity of Sita who had been living for so long in the house of the wicked Rakshasa, however involuntarily. Thus insulted, Sita was sorely aggrieved and threw herself into the flames. But the God of Fire would not injure her. She was the better for having gone into the fire even as a gold neck-lace. *Agni* himself bore her towards Rama and presenting her to him said "Take back Janaki who is of spotless purity, sinless and stainless. She is Lakshmi incarnate even as you are Purushottama incarnate."

Rama accepted Sita and with all his followers returned to Ayodhya making an aerial journey on the *Pushpaka Vimana*, He there took back the Kingdom from Bharata and with his coronation performed, reigned for long as king.

॥ श्रीरस्तु ॥

भासकथासारः ॥

द्वितीयो भागः ।

॥ श्रीरामचरितम् ॥

यः सत्ये गुरुमासयन्नुपनतां तत्याज राज्यश्रियं
यः सन्तोषयितुं प्रजाः परिजहारापन्नसत्वां प्रियाम् ।
तस्योपाश्रितकोशराक्षसपरित्राणप्रतिष्ठागुरो-
र्धर्मे सूक्ष्मगतौ जयत्यवनिजाजानेरभेद्या स्थितिः ॥

(१)

आसीदशेषकल्याणनिलयेषु कोसलेषु अयोध्या नाम यथार्थाभिधाना राजधानी । तत्र च प्रमुदितप्रजावत्सलानां, प्रचण्डविक्रमाणां चण्डभानुवंशमहत्तराणां ललामभूतः, पुलोमजा-रमणप्रतिविसृष्टार्धासनसभाजनोचितः, सुरासुरसङ्ग्रामेष्वप्यप्रति-हतमहारथो दशरथो नाम राजा लीलानुशासितमहीवलयः सुचिरं व्यलासीत् । स च बहुवर्षसहस्राणि राज्यभारं निर्वाह्य परिखिन्नः सञ्जातजरावैक्लव्यो विषयव्यावृत्तकौतुकश्चरमव्रतमिक्ष्वाकूणां

वैखानसीं वृत्तिमाशिश्रयिषुः कुलामात्यप्रकृतिमण्डलानां सुचिर-संभृतकौतूहलमनुरुन्धानो वयःस्थं जनलोचनचन्द्रं रामचन्द्रं राज्यश्रिया सङ्गमयितुं तत्वरे ॥

अथाभिषेककृताभिमुख्यैर्वसिष्ठमुख्यैरुद्दिष्टे पुण्येऽहनि संप्राप्ते, प्रहृष्टनरनारीजना, संयोजितविशेषालङ्करणविधिपरिशोभमाना, समन्ततः प्रचलितोत्सवमङ्गला साकेतनगरी, प्रतिक्षणं नूतनेव कामपि श्रियमुररीचकार । समाह्रियन्त च राजकुले तद्विधावसरोचितसम्भ्रमेणाभिषेकसंभाराः । तथा हि—समुद-श्रायि सव्यजनं छत्रम् । अकल्प्यत सनन्दिपटहं भद्रासनम् । न्यस्यन्त च तीर्थाम्बुपूर्णाः सुवर्णघटाः । अयुज्यत पुष्यरथः । सन्न्यधीयन्त सामात्यपुरोहिताः पावनदर्शनाः सहस्रमवनीसुराः। एकप्रकारसंक्षिप्ताः सभायां पौरजानपदाश्च सममेल्यन्त । स च भगवान्वसिष्ठः कालोचितक्रियाकलापप्रत्यवेक्षणव्यग्रः पवित्रावकाशां वेदीमध्यतिष्ठत् । धुर्यं स्वतनये क्रमेण भुवनरक्षाधुरामवतारयिष्यति दशरथे तत्सौराज्येन चिरानुभूतस्वास्थ्योऽपि गुणपक्षपाती जनोऽकृतपूर्वं तोषमधत्त ॥

अथ परिणामोन्मुखमनोरथो दशरथः सभायां स्निग्धतरमाभाष्य तनयमङ्कमारोप्य, साश्रुगद्गदं, "पुत्र, राम, प्रतिगृह्यतां राज्यम्" इत्युदाजहार । विनयाद्बहुमानाच्च तदप्रतिपद्यमानेन चरणपतितेन रघुनन्दनेन निर्बन्धतः स्वमतमङ्गीकारयामास च । अथारब्धे पटहे, भद्रासनलङ्घिनि रामभद्रे शत्रुघ्नलक्ष्मणगृहीतो-

श्रमितेऽभिषेकघटे, छत्रे च स्वयं नृपतिना गृहीते, अन्तरा प्रविश्य मन्थराभिधाना सरभसमवनीपतेः कर्णे किमपि जजाप। यया किल सद्योविघ्नितामिषेकमङ्गलया प्रफुल्लपौरजानपदमुखराजीवे सदस्यकालोपनतनीहारवृष्टिलीला व्यधायि। दशरथोऽपि वज्रनिर्घातेनेव प्रक्षुब्धमतिः सञ्जातशोकज्वरज्वालपरीतकरणः सवैक्लव्यमाहूय तनूभवं कृच्छ्रेण विश्रमितुं विससर्ज। स तु प्रतिबद्धेऽपि राज्यलक्ष्मीप्रतिग्रहमहोत्सवे, अलोलुपतया, अतिगम्भीरतया यथाभूतवदनोल्लासोऽभिबन्ध्य पितरं, "दिष्ट्या स एवास्मि रामः" इति मोदमानो मैथिलीमिमं वृत्तान्तमधिगमयितुं धृतकौतूहलस्तदावसथमाससाद॥

तत्र चाभिषेकवार्ताहारिणे चेटीजनाय परितुष्य प्रत्तसर्वाभरणशून्यीकृताङ्गलतां, नेपथ्यपालनीमुपहसितुं अवदातिकया चेट्या चोरितोपहृतं वल्कलयुगळं कौतुकेन परिधाय, "किं मे शोभते" इति सखीजनमनुयुञ्जानां, तदात्वेऽप्यक्षीणलावण्यसम्पन्मनोहरां हृदयदयितां दयितामालुलोके। कृतसम्भाषश्च तया क्षणं यावत्तिष्ठति तावत् "हा हा महाराज" इति नरनारीजनस्य निर्मर्यादो महानार्तध्वनिः श्रोत्रपथमवातरत्॥

ततः सत्वरापतितः कञ्चुकी राज्यलोभाद्भरताभिषेकं याचमानायाः कैकेय्याः कार्कश्यमभिचुक्रोध। निजपक्षपातेन गुरुजनमपवदन्तं तमवस्थापयन् प्रत्याह राघवः—"आर्य, किमलाक्रोशस्थानम्? गुणानेव पश्यामि मदभिषेकनिवृत्तौ॥

वनगमननिवृत्तिः पार्थिवस्यैव ताव—

मम पितृपरवत्ता बालभावः स एव ।
नवनृपतिविमर्शे नास्ति शङ्का प्रजाना-
मथ च न परिभोगैर्वञ्चिता भ्रातरो मे ॥

अपि च—

शुल्के विपणितं राज्यं पुत्रार्थे यदि याच्यते ।
तस्या लोभोऽत्र नास्माकं भ्रातृराज्यापहारिणाम् ॥"

इति । समादिशच्च कञ्चुकिनं मातृपरिवादं विना महाराजवृत्तान्तं अभिधातुम् । श्रुत्वा च तन्मुखादतिसृष्टकैकेयीप्रार्थनं सद्यो मोहमुपागतं राजानं नितरामखिद्यत ॥

तदनु धनुष्पाणिराविर्भूय क्रोधमूर्च्छितो लक्ष्मणः प्रक्षुब्ध इव प्रलयवारिधिरित्थमुदगर्जत् । "अहो बत क्षत्रियाणामपि क्षीणसत्त्वता । धिक्, एते वयं विश्रुतवीरापदानाः प्रक्रान्तचापल-याप्यबलया केवलमेवं परिभूयामहे । तन्नालमस्याः पापाशयाया-श्चिरकाङ्क्षितसङ्गमेप्यार्येऽभिनिविशमानां यदियमपचकर्ष निर्भ-
क्ष
रास्ूययेव राज्यश्रियम् । पश्यत लोभानुसूदितायाः नृशंसताया विलसितम् । मणिमकुटधारणप्रसाधिते शिरसि तन्मुहूर्त एव जटामाबद्धथ चतुर्दश वर्षाणि नाम वनमवनोचितेन भवनी-कर्तव्यम् । जराजर्जरमतिनाप्यवनीपतिना नियतिरिव दुर्व्यवस्थेयं केनाप्यसम्बद्धेन धर्मव्यवहारेणानतिक्रमणीयेति कृत्वा दुःख-दावानले निपात्यते ह्यात्मा । वयंतु प्रचलिताः सद्यो युवतिरहित-

मेव भुवनतलमखिलमापादयितुम् । तिष्ठतु तावदार्यो यदि न सम्मन्यते । मुञ्चतु मां भवान् यतः कलितनिश्चयोऽस्मि " ॥

इति समारब्धसंरम्भभीषणं तमनुजन्मानं पेशलाक्षरैः सान्त्वनोपक्रमैर्मातृनियोगप्रतिबद्धस्वातन्त्र्याणां पातकपर्यवसायिनः क्रोधस्यानवसरमुपदर्शयन्समाधाय रामचन्द्रस्तस्य हृदयोत्तापं शनैरशमयत्। उररीचकार च प्रशान्तगम्भीरे मनसि कनिष्ठमातुः प्रत्यक्षोदीरितनिर्विशेषमविलक्ष्यरूपमनुशासनमुरुतोषेण ॥

अथ तदात्वोपनतान् सीताकौतुकवर्धनश्रद्धया नेपथ्यपालन्या स्वयं प्रेषितानन्यानभूतान् वल्कलानात्मने रामः प्रतिगृह्य दुर्निवारानुगमनव्यवसायेन सौमित्रिणा सह विभज्य सत्वरं पर्यधात्। धृतारण्यकवेषश्चानपेक्षितगुरुजनामन्त्रणविधिः मुहूर्तमवतिष्ठस्व वत्सेत्यतिकरुणमुल्लपन्तमापतन्तमपि तातं श्रुत्वा कान्तारगमनप्रत्यूहपरिजिहीर्षया दृढनिश्चयाकलनकठोरहृदयः क्षणमात्रमपि विलम्बमसहमानः, प्रार्थितयापि प्रथमप्रतिपन्नचीरपरिधानमपरित्यजन्त्या प्रकाशितानुप्रवसनसिद्धान्तया कान्तया परिष्कृतपार्श्वः, सौभ्रात्रशेवधिना लक्ष्मणेन पुरो निर्दिश्यमानमार्गो दीनाक्रन्दनशरणपौरलोचनाम्बुप्रवाहोपसिक्तनीरजःकृतप्रतोलीकां तदुपक्रममुत्सादितोत्सवाशंसां रघूत्तंसः पुरीमयोध्यामतिलङ्घ्य समचलद्विपिनाभिमुखम् ॥

निर्गते च सदारानुजे रघुनन्दने, नरपतिः पतन्निव पतङ्गः शुष्यन्निव महोदधिः विशीर्यमाण इव धरणिधरः पारे वाचामङ्गकै-

राधिपरिक्षीणैः कार्पण्यमुद्वहन्नसह्यपीडेन हृदयावस्कन्दिना शोकशङ्कुनाऽतिकरुणमन्तस्संग्लपितः कौसल्यासुमित्राभ्यां स्वयं निगृहीतात्मशोकाभ्यामन्वास्यमानश्चरमशय्यामधिशिश्ये। स तदानीमतिभूमिं गतेन चिन्ताव्याधिना शिथिलेन्द्रियमतिव्यथमानो विवशमनेकधा व्यचेष्टत। तथा हि—शश्वदाविष्टतीव्रमन्युपिशाचिकावेगादिव शयनादुत्थायोत्थाय न्यपतत्। मुहुर्मुहुः स्मृतिवशादाघट्टितहृदयनिखातकैकेयीदुर्वचनशल्य इव दुस्सहवेदनामनुभवन् हा हेत्युच्चैर्विललाप। परित्राययितुमिवात्मानमबलाव्यालीमुखात् पुनः पुना राम रामेत्याचक्रन्द। मृत्युपरिगृहीतस्य मे चरमदर्शनं वितरत पुत्रका इति पदे पदे भृशं परिदेवयाञ्चक्रे। परिपालितपितृसङ्करो महाप्रभावोऽनया गर्भे धृत इति वारं वारमतिमानेन बहुमानेन प्रियवचनैः कौसल्यामन्वरुध्यत। पुत्रविवासनेन कृतापकारमात्मानं क्षमापयितुमिव दीनवदनस्तामसकृन्निश्वसन्नवलुलोके। धिङ्मां स्त्रीमतिपरिगृहीतं लोकोपहास्यं मन्दधियमिति विलज्जमान इव भूयो भूयो मोहमहातमसि निलिल्ये। निसर्गाऽनुकम्पिनापि प्रियनन्दनेन निरनुक्रोशमुपेक्षितस्य मम कोऽर्थो जीवितेनेति वैराग्यादिव शोकदावानले प्राक्षिपत्स्वमात्मानम्॥

तस्य च तदा निरतिशयतनयविरहानलपरिप्लुष्टहृदयस्यानारतं प्रमुह्यतः प्रतिबोधं विना कौसल्यासुमित्रयोरपि प्रत्यभिज्ञा दुश्शकैवासीत्। अदृश्यभूते लोचनसुधाकरे रामचन्द्रे विसृत्वरतमोनिमीलितमिव नयनयुगलमन्धीबभूव। रामान्वेषणप्रस्थितेव प्रयत्नावस्थाप्यमानापि बुद्धिः स्वनियोगाद्व्यभ्रंशे॥

एवमप्रतीकारायां दशायां वर्तमानं सकृत्कृतान्तमुपालभमानं सकृदात्मानमेव दुष्कृतकारिणं कुत्सयमानं कदाचित्कैकेयीं विगर्हमाणं भूयस्सस्नेहपरितापं पुत्रकानाह्वयोन्मत्तवद्बहु प्रलपन्तं अतिकरुणदर्शनं पार्थिवं रामसकाशात्प्रतिनिवृत्तः सुमन्त्रः सविषादमुपगम्य व्यजिज्ञपत्—"देव, शृङ्गिबेरपुरं प्राप्य ते महाराजस्य प्रणाममावेद्य कमप्यर्थं विज्ञापयितुमारभमाणा बाष्पस्तम्भितकण्ठत्वात् किमप्यनुक्त्वैव वनोदरमविशन्" इति । तच्छ्रुत्वा महीपतिः कैकेय्यास्तादृशं विपाकदारुणं दुरभिनिवेशं स्मारं स्मारमतिनिबिडमुत्पीडितहृदयो,

गतो रामः प्रियं तेऽस्तु त्यक्तोऽहमपि जीवितैः।
क्षिप्रमानीयतां पुत्रः पापं सफलमस्त्विति ॥

सावेगाक्रोशमुल्लपन् निजपुत्रकाणां पुनरवलोकननैराश्याद्द्विगुणीभूतमोहोपहतचेतनः प्रतिक्षणं परिशुशोष । अन्ततः स्वमाश्वासयितुमिवोपागतैः तत्क्षणप्रत्यक्षितैः दिलीपाजमुख्यैः पितृभिरुपच्छन्दितमात्मानं सम्भावयंस्तैः सञ्जिगमिषुः, 'अयमहमागच्छामि' इति वचसैव मूर्छया परामृष्टः स क्षणाद्विषदवसथमारुरोह ॥

अनन्तरमराजकोपहतमिक्ष्वाकुजनपदमवलोक्य विधिज्ञैर्वसिष्ठानुमोदितैरमात्यमुख्यैर्दशरथवचनमर्थवत्कुर्वद्भिः आबाल्यान्मातुलकुले वास्तव्याय भरताय प्रेषितः ससूतो रथः। स च, दृढमकल्यशरीरो महाराज इति केवलमाश्वावितनिजोपप्रेषणहेतुः सूतेन बलवदुत्कण्ठितस्त्वरितमयोध्यापरिसरमुपासीदन्, "एकनाडिकां यावत्प्रतिपाल्य प्रतिपन्नायामेव रोहिण्यां पुरीं प्रवेक्ष्यति

कुमार" इत्युपाध्यायेन विज्ञापितः क्षणं विश्रमितुकाम उपान्तिके वृक्षान्तराविष्कृतं देवकुलं प्रविवेश ॥

तत्र च विश्वसनीयमानुषभावानां चतसृणां प्रतिमानां स्तोममालोक्य नमितशिरा वन्दितुमुपक्रममाणोऽसौ सहसोपेतेन देवकुलिकेन, "क्षत्रिया ह्यत्रभवन्तो, न भवादृशस्य प्रणामार्हा" इत्यवार्यत। अथ विस्तरं पृष्टः स देवकुलिको, यावत्तिस्रः प्रतिमा दिलीपरघ्वजानामिक्ष्वाकुकुलपूर्वपुरुषाणां नामतो निर्दिश्य दशरथाकृतिसंवादिनीं तुरीयामुपसीदति तावत्पर्याकुलो भरतः, "किं धरमाणानामपि प्रतिमाः स्थाप्यन्ते" इति तं पर्यपृच्छत्। सोऽवदत्—"न खलु। अतिक्रान्तानामेव" इति। अतःपरं श्रोतुमक्षमो भरतः किमप्यत्याहितमापतितमाशङ्कमानो यदा सरभसमपचक्राम तदा देवकुलिकः क्रूरमेवमभाणीत्—"तिष्ठ,

येन प्राणाश्च राज्यं च स्त्रीशुल्कार्थे विसर्जिताः।
इमां दशरथस्य त्वं प्रतिमां किन्न पृच्छसि ॥-' इति।

श्रुत्वैवं अशनिहत इव मुमूर्छ कैकेयीसूनुः। अथ प्रतिबुध्य, तादृशावस्थाविशेषेण स्वं कैकेयीपुत्रं प्रत्यभिजानतः तस्य मुखादेव शुल्कलुब्धया स्वजनन्या ससीतालक्ष्मणमरण्याय निर्वासितं राममवगत्य, "कथं कथमार्योऽपि वनं गतः? किमहमुपहृतभागधेयः पित्रा भ्रात्रा च वर्जितामटवीभूतामयोध्यां पिपासार्तः क्षीणतोयामिव नदीमनुधावामि?" इति शोचन् स द्विगुणितमोहाभिभूतचेतनो निस्संज्ञः पपात भूपृष्ठे ॥

तत्क्षणमुपतस्थे तत्र सुमन्त्रोपदिष्टमार्गं दशरथप्रतिमा-दिदृक्षया कौसल्यापुरोगमन्तःपुरम् । तदा देवकुलिकेन निर्दिश्य-मानावस्थं भरतं प्रत्यभिजानत्यः परिवार्य देव्यः पर्यदेवयन्त। अथ मातृकरावमर्शोपलब्धस्वास्थ्यो भरतः समाश्वस्य सुमन्त्र-निर्दिष्टनामधेये कौसल्यासुमित्रे अभिववन्दे । कैकेयीं पुनरव-लोकितुमपि नैच्छत् । किञ्च "निपातिता वयं सान्वयाः सपौर-जानपदाः सर्वे भर्तृद्रोहिण्या नृशंसया त्वया" इति तां भृशमधिचि-क्षेप । अथ च, "जात, किं मया कृतम्? महाराजस्य सत्यवचनं रक्षन्त्या मया तथोक्तम्। तदापराद्धयति ते शुल्कलुब्धो मातामहः" इति प्रक्रान्तसान्त्वनां कैकेयीमभिक्रुद्धो भरतः — "कथं शुल्के सभार्यस्यार्यस्य वनवासोऽप्युदाहृतः । यदि ते राज्यफलतर्षः, किं नरेन्द्रो न दद्यात् । किमर्थं मन्नाम कीर्तयित्वा मामयशस्तमस्य-काण्डे पातितवत्यसि । कष्टं कृतं भवत्या । म्रियमाणः पतिर्न गणितः । दयिततनयाः क्रोशन्त्यो नानुकम्पिताः मातरः । कृत्स्ना-प्ययोध्या रोदनशरणा नावेक्षिता । न गणितोऽप्यात्मा धिगिति वचसा लोके समाकृष्टः । अहो धात्रा सृष्टं भवत्या हृदयं वज्र-कठिनम् । धिक् त्वां दुष्कृतकारिणीम्" इत्यवभर्त्सयमानस्तस्यै न प्रससाद । अभिषेकमधिकृत्य तु सह प्रकृतिभिः प्रत्युद्गम्य वसिष्ठवामदेवाभ्यां विज्ञापितो, "राज्यलुब्धायै इहात्मभवत्यै प्रदीयताम्" इति निष्ठुरमुक्त्वाऽप्रविशन्नेवायोध्यां रामतपोवन-मभिप्रतस्थे ॥

समुपगम्य च चित्रकूटाचलोपरचितां भ्रातुः पर्णशालां कैकेयीचापलात्सङ्क्रान्तकृतघ्नभावमिव स्वं मन्यमानो लज्जमानमानसो भरतो दूरादेवोपावर्तमानः समुपस्थितमात्मानं सविगर्हमुदघोषयत्। तदा स्पष्टघनेन हृदयानन्दनेन बन्धुजनबहुमानावहेन तस्य तेन स्वरसंयोगेन स्नेहपरिक्लिन्नहृदयो रामः सौमित्रिं पुरुषविशेषमवधारयितुमभ्यचोदयत्। तद्वचनेनाभिमुखापतितं लक्ष्मणं निजाग्रजं सुमन्त्रेण निवेद्यमानं कैकेयीसूनुर्यथोचितमभ्यवादयत। अथ लक्ष्मणमुखाद्विदितनिजागमनं राघवं, मैथिल्या सादरं प्रत्युद्गम्य प्रवेशितो भरतः सभक्तिविनयमुपसृत्य स्वनामनिवेदनपूर्वकं प्रणनाम। तदानीं रामभद्रः प्रेमदृढमेनमाश्लिष्य, सुमन्त्रं च दृष्ट्वा तातव्यपायाश्रितया कथया प्रकीर्णबाष्पपूरः शोकव्याकुलितेन्द्रियः सुचिरमवतस्थे ॥

अनुपदमभ्याश एव स्थातुकामं भरतं, "वत्स, पालनधर्माणो वयमिक्ष्वाकवः। तदनुचितमिहावस्थातुम्। अपि च भवद्विधं श्लाघ्यगुणं पुत्रमुत्पाद्य किं नाम नः पिता मिथ्याभिधायी भवतु। यस्य किल वाक्यमवितथीकर्तुमेवाहं वनभुवमुपागमम्। सत्यधनं हि नः कुलम्। कथं भवानन्यथा प्रवर्तते। तत्सत्वरं निवर्तस्व परिरक्षितुं स्वराज्यम्" इति निरुत्तरमन्वशात्। तदाज्ञावशंवदो भरतो व्यजिज्ञपत्— "आर्य, तेन हि मम हस्ते निक्षिप्तं तव राज्यं चतुर्दशवर्षान्ते त्वया प्रतिग्राहयितुमिच्छामि। अन्यच्च, प्रसादयतु मह्यमार्यः पादोपभुक्ते इमे पादुके। अत्रैवा-

भिषेकोदकमावर्ज्य अनयोर्विधेयः सन् भवदागमनावधि परिपालयिष्ये भुवनम्" इति ॥

ततः प्रीतेन भ्रात्रा सबहुमानं प्रसादीकृते पादुके गृहीत्वा समापृच्छ्य च स्नेहविक्लवमाश्रमद्वारावधि विहितानुयातं बन्धुजनं, भरतो, "हन्त भोः, अद्यैवास्मि,—

श्रद्धेयः स्वजनस्य पौरुचितो लोकस्य दृष्टिक्षमः
स्वर्गस्थस्य नराधिपस्य दयितः शीलान्वितोऽहं सुतः।
भ्रातॄणां गुणशालिनां बहुमतः कीर्तेर्महद्भाजनं
संवादेषु कथाश्रयो गुणवतां लब्धप्रियाणां प्रियः॥"

इति परितुष्यन्, प्रकामं विशदान्तरङ्गः सुमन्त्राधिष्ठितं रथमारुह्य अयोध्यामभिप्रतस्थे ॥

(२)

अथ कदाचिद्वह्वपाये वनप्रवासे भ्रातुरुद्घातपरम्पराश्रवणेन निस्सहपरीतापप्रदग्धहृदयं साक्रोशनैष्ठुर्यं निजोपालम्भप्रवृत्तं भरतं, भवितव्यतायाः प्राबल्यमुपदर्श्य, तथाऽध्यवसितदैवपारतन्त्र्येणोपहतचेतसो निमित्तमात्रभूतस्य स्वस्यानपराद्धतायां प्रत्याययन्ती च, सुमन्त्रानूदिता सानुनयं कैकेयीत्थमुपन्यास्थच्चिरकाङ्क्षितोद्घाटनावसरं, निजवरद्वयाऽऽदानप्रवर्तकं, अनन्यथाभवं दशरथस्य शापम्। "पुरा किल मृगयां गतेन महाराजेन

कस्मिंश्चित्सरसि कलशं पूरयमाणो, वनगजबृंहितानुकारिशब्द-समुत्पन्नवनगजशङ्कया विपन्नचक्षुषो महर्षेश्चक्षुर्भूतो मुनितनयः शब्दवेधिना शरेण हिंसितः । तेन च सत्यभाषिणा महर्षिणा-ऽविषह्येन पुत्रव्यपायव्यलीकेन प्राणान्परित्यजता शप्तो महाराजः । —'त्वमप्येवं पुत्रशोकाद्विपत्स्यसे' इति । तत्र च मामपराधे निक्षिप्य दैवेन पुत्रको रामो वनं प्रेषितः । तन्मां न राज्यलुब्धां मन्तुमर्हसि । अपरिहरणीयो मुनिशापः पुत्रविवासनं विना कथं विरमति । किं च मातुलकुले वर्तमानस्य ते प्रकृतिभूतो विप्रवास इति राम एव प्रव्राजयितव्य आसीत् । यत्किल चतुर्दशदिवसा इति वक्तुकामया पर्याकुलहृदयया चतुर्दशवर्षाणीति मयोक्तं तदपि दैवतन्त्रकमेव" इति ॥

तदा तत्सर्वमनूद्य सुमन्त्रः पुनर्न्यवेदयत्— "कुमार, वसिष्ठवामदेवप्रभृतीनां सर्वमेतद्विदितमनुमतं च" इति । तच्छ्रुत्वा विश्वस्तहृदयो भरतः, "हन्त त्रैलोक्यसाक्षिणः खल्वेते । यद्यनुमतं तेषां नात्र विचारणाया अवसरः । दिष्ट्या अनपराद्धात्मभवती" इत्युक्त्वा परितुष्य भ्रातृवात्सल्यादुत्पन्नमन्योः स्वस्यापराधान् क्षमापयित्वा च मातरमभिववन्दे । अजहाच्च तदादितस्तां प्रत्य-न्यथाग्रहणेन सुचिरसम्भृतं हृदयकालुष्यम् ॥

अथायोध्यारक्षामुपदिश्य निवर्तिते भरते, दक्षिणाशा-विस्तीर्णेष्वरण्यभागेष्वविरलमास्तीर्णानामाश्रममण्डलानां दर्शन-कुतूहलिना, वृद्धोपसेवाहेवाकिना च मनसा, ससीतालक्ष्मणो

दाशरथिश्चित्रकूटाचलात्प्रचचाल। गच्छंश्च मार्गोपरोधिनं विराधं दण्डकारण्यप्रवेशनान्दीमुखोपहारतां नीत्वा, प्रशान्तचित्तविभूतिष्वाश्रमपदेष्वासेवमानो निजदर्शनोत्सुकिनः सत्याशिषः शरभङ्गप्रभृतीनमिततेजसो महर्षीन्, प्रतिश्रुत्य च तेषां निश्शेषपिशिताशनशल्यनिर्हरणं, स क्रमेणातिलङ्घ्य नानामृगगणाकीर्णं नदनदीशतैरन्तरा सीमन्तितमतिरमणीयसमृद्धिदर्शनीयतमं सुदूरं वनगहनमार्गं, अन्ततः प्राप कुम्भोद्भवोपदिष्टं, खरप्रमुखक्रूरक्रव्यादपातकाधिष्ठानं जनस्थानम्। तत्र च गोदावरीमारुतोपवीजितायां पञ्चवट्यां, लक्ष्मणोपरचितं, जनकनन्दिनीकरकमलोपात्तकलशांबुसेकपरिवर्धितावन्ध्यतरुषण्डोपशोभितं, अयोध्यानिर्विशेषोपभोग्यमाश्रमपदमश्रमेण चिरमुध्युवास ॥

तत्रैकदा दुरभिनिविष्टशूर्पणखाविरूपकरणप्रधर्षणेनामर्षितं चतुर्दशसहस्रमितराक्षसानीकमूर्धन्यं, सदूषणत्रिमूर्धानं कृताभिषेणनं खरमेकाकी रघुनन्दनो मुहूर्तात्कथाशेषतामुपनिन्ये। अनेन च निरवशेषजनस्थानरक्षोबलप्रमाथसंरम्भेण सम्भाव्यमानविक्रमक्रमधुराधर्षं रघुवीरमन्तरेण सन्धुक्षितस्य वैरानलस्य, निस्तुलावण्यलेखाभिनिवेशिनः कदर्थयतः कन्दर्पतर्षस्य च, युगपत्प्रतीकारविधेः कुहनासम्प्रदायेन जानकीहरणमेवौपयिकं निश्चित्य लङ्केश्वरः, कदाचित्तीर्थयात्रातः प्रतिनिवर्तमानस्य कुलपतेः प्रत्युद्गमनसमुदाचारेणासन्निहिते लक्ष्मणे, स्वयमुपहृतसलिलानुकम्पितबालवृक्षकां किञ्चिदिव परिश्रान्तां जानकीं निकषोपावेश्य,

समनन्तरदिनोपावर्तिनं तातस्यानुसंवत्सरिकश्राद्धविधिं कल्पविशेषेण स्वस्य च तातस्य च यथानुरूपं निर्वर्तयितुमाहितचिन्तं मन्त्रयमाणं रामभद्रं, लब्धान्तरो विश्वसनीयं परिव्राजकलिङ्गमङ्गीकृत्यातिथिरिवाभ्यवर्तत ॥

पूजितश्च ताभ्यां निजान्वयश्रुतादिकं वर्णयन् प्रसङ्गेन श्राद्धकल्पेऽभिज्ञत्वमात्मन उपन्यास्थत् । तेन च सञ्जातकुतूहलो राघवः पर्यपृच्छत्— "भगवन्, निवपनक्रियाकाले केन पितॄंस्तर्पयामि । विशेषोऽभिधीयताम्" इति । स प्राह— "हिमवतः सप्तमे शृङ्गे प्रत्यक्षस्थाणुशिरःपतितगङ्गाम्बुपायिनो वैडूर्यश्यामपृष्ठाः पवनसमजवाः काञ्चनपार्श्वा नाम मृगाः प्रतिवसन्ति ।

यैस्तर्पिताः सुतफलं पितरो लभन्ते
हित्वा जरां खमुपयान्ति हि दीप्यमानाः ।
तुल्यं सुरैः समुपयान्ति विमानवास-
मावर्तिभिश्च विषयैर्न बलाद्धियन्ते ॥"

इति । तच्छ्रुत्वा "तर्हि तानद्याहरिष्यामि" इति कृतसंरम्भं राघवं पुनरुवाच कपटकर्मन्दी— "अलमतिमनोरथेन । न ते मानुषैर्दृश्यन्त" इति । अथ सुधीरमुदाजहार रामभद्रः—"यदि हिमवान्सौवर्णान्मृगान्न मे दर्शयिष्यति बाणैः क्रौञ्चदारं तं विदारयिष्यामि" इति, तत्क्षण एव विद्युत्सम्पात इव लोचनहरो दूरादाविरभूत्काञ्चनपार्श्वो मृगः । "दिष्ट्या हिमवान्मयि परितुष्टः । अहो तातस्य भाग्यम्" इति मोदमानो रामस्तमुप-

च्छन्दयन्नर्घ्यमादायोपससर्प । मृगस्तु पूजामनवेक्ष्य पुरःपुरो धावन् राघवं सुदूरमाचकर्ष ॥

अथाक्षिगोचरमतिपतिते रामभद्रे, दशाननः स्वं रूपं गृहीत्वा भयविह्वलाङ्गीं भर्तारमेव पुनःपुनराक्रोशन्तीं कुररीमिव वृषदंशकः सीतां हठादाक्रम्य रथेऽवस्थाप्य खमुत्पतितः। तथा ह्रियमाणां जानकीं दृष्ट्वा निजसख्यस्य दशरथस्यानृण्यमिच्छन् जटायुनाम गृध्रराजः "मयि स्थिते क्व यास्यसि" इति तर्जयन्नभिपत्य पापाशयमेनं पक्षाभ्यां विक्षिपन्, तुण्डेन खण्डयन्, नखरैश्च विदारयन्, सक्रोधं रुरोध । रावणस्तु रोषादुद्वृत्तनयनः प्रयुद्धयमानं पतगेश्वरमसिना दक्षिणांसदेशे गाढं प्राहरत्। तेन निकृत्तावयवः सद्यो गतायुरवनितलमाससाद जटायुः ॥

अत्रान्तरे एकप्लुत्यतिक्रान्तशरविषयं तमपूर्वहरिणमनुद्रुत्य विफलश्रमः सीतापतिः सचिन्तायासं यावत्प्रतिनिववृते तावत् सीताशून्यमुटजमपश्यत् । अथ प्रत्यासन्नतापसमुखाद्यथावृत्तमधिगत्य, विदीर्यमाण इव शोकेन बहु विलपन्, लक्ष्मणेन कथञ्चित्पर्यवस्थाप्यमानः काननभुवमनास्थया विचरन् वनौकसां धाम किष्किन्धामवाप । तत्र च निजाग्रजेन बलिना वालिना सदारापहारं निर्विषयीकृतो हनूमत्प्रभृतिभिः कतिपयैरेव स्निग्धैरुपास्यमानः सुग्रीवो नाम वानरमुख्यो महर्षिशापमहिम्ना वालिना दुरासदं ऋश्यमूकपर्वतशृङ्गमवासभङ्गः कृच्छ्रेण प्रतिवसति स्म। अथानयोस्तुल्यदुःखयोः परस्परोपकारकृतप्रतिज्ञयोः सन्धिरघटिष्ट ॥

तदनु तदनुरोधेन तौ निरन्तरोपचीयमानस्निग्धभावौ, अतुलभुजबलावलेपं हेममालिनं वालिनं निगृहीतुकामौ नियुद्धाय तमभिमुखीकर्तुं प्राक्रमेताम्। अथ सुग्रीवक्ष्वेलिताकर्णनप्रज्वलितमन्युः शतमन्युसूनुरवधीरितताराप्रतिषेधवचनो गर्जन्नभिपत्य प्रक्रान्तविनयातिक्रममाक्रम्य विग्रहोद्धुरं सुग्रीवं मुष्टिनिर्घातनिष्पीडितग्रीवमुद्ग्रीवितासुमकरोत्। ततः सम्भ्रान्तेन हनुमता तामवस्थां प्रतिबोधितो रामभद्रस्तरुशाखाप्रच्छन्न एव वालिनं सप्तसालीविदारणदारुणमुखस्य शिलीमुखस्य शरव्यतामनैषीत्। स च तेन मर्मसु निहत्य सहसा निपातितः प्रस्रुतरुधिरप्रसेकपिच्छिले भूतले दुस्सहव्यथया कृतपरिसर्पणो धूळीधूसरिताङ्गः पतङ्ग इवासन्नास्तमयः सीदन् मुमूर्षुरिषुवाचितनामानं राघवमाहवानभिमुखं भृशमकुत्सयत। अस्थानोपक्रोशिनं तमुपगम्य रघुवीरः कृपाकुलमनाः समबोधयत्॥

"वागुराच्छन्नमाश्रित्य मृगाणामिष्यते वधः।
वध्यत्वाच्च मृगत्वाच्च भवाञ्छन्नेन दण्डितः॥

यवीयसो दाराभिमर्शनपातकी वध्य एव भवान्ननु। तेन हि युक्तदण्डानां योग्यमेव कृतमस्माभिः। मद्विहितेन च दण्डेन विगतपाप्मा त्वमनन्तांल्लोकानवाप्स्यसि" इति॥

अतःपरं निरुत्तरो वाली प्रबलानुशयतरळितान्तरङ्गं शोचन्तं सुग्रीवं "ईदृशो लोकधर्मः" इति समाश्वास्य स्वतनयमङ्गदं तस्य हस्ते निक्षिप्य, "प्रतिगृह्यतामस्सत्कुलधनम्" इति

स्ववक्षःसंभुक्तां हेममालाञ्च तस्मै प्रतिपाद्य राघवं प्रसाद्य स्वर्ग-भागी बभूव। ततो यथाविधि तस्य हरिप्रवरस्यौर्ध्वदेहिकं निर्वर्त्य रामलक्ष्मणौ सुग्रीवं किष्किन्धाराज्येऽभ्यषेचयताम्॥

एवं निस्तीर्णस्वप्रतिज्ञाभरो निर्भरविरहोत्कण्ठाकुण्ठितानुभावो लक्ष्मणाग्रजः सुग्रीवस्य कृतज्ञतावीरुधः फलदर्शनानुकूलं कालं प्रतीक्षमाणोऽवतस्थे। ततस्तेन वानराधिनाथेन सीता-विचयनार्थं सर्वासु दिशासु प्रेषितेषु प्लवङ्गमपुङ्गवेषु, दक्षिणापथ-प्रवृत्तः कुमारोऽङ्गदो वेलातटमासाद्य सम्पातिमुखाल्लङ्कायां स्थापितां जानकीमवगत्य महाजवं वायुसूनुं हनूमन्तं प्रोत्साह्य रावणराजधानीं प्रविचेतुमुद्योजयामास। स च निरतिशयमहिमा रामकार्यगरिमाणमनुसन्धाय पाथसान्नाथमेकोत्पातेनातिलङ्घ्य लङ्कामवाप॥

(३)

अथ निशाताहर्नाथमहसि निशामुखे, दशमुखमन्तरा प्रकुपितकृतान्तभ्रकुटिभीमवीक्षणस्य प्रथमावतारमार्गादेशक इव, प्रत्यादेशभूतामलकायाः प्रधाननगरीं यातुधानानां, अलक्षित-सञ्चारोचितं वपुषा तनूभवन् स हनूमानुल्लङ्घितप्राकारगोपुरः प्रविश्य नवरत्नखचितसुमेरुशृङ्गभङ्गीमनोहरासु प्रासादपरम्परासु

स्वेच्छया विचचार । अन्ततः समधिगम्य सन्ततोल्लसितलक्ष्मी-प्रसादमेदुरं निशाचरेन्द्रप्रासादं, अन्विष्य च दिव्यभोगोचित-सामग्रीविशाला विश्रमशालाः निरन्तरप्रत्युसरन्नावळीभासमानान् विमानान्, निद्रावशास्तस्तमुत्तानशयान्तःपुररमणीरमणीयतल्प-गर्भान् गर्भागारांश्च, कुत्रापि जनकराजनन्दिनीमप्रेक्षमाणः पव-माननन्दनः, "अहो व्यर्थो मे परिश्रमः" इति विषीदन् याव-दुन्नताग्रमेकं हर्म्यशृङ्गमारुह्य परितः पश्यति तावद्विचितचरी-मदूरस्थां प्रमदवनराजिमलक्षयत् ॥

प्रविश्य च तां कल्पितक्रीडाशैलप्रेक्षणीयां, विचरदण्डज-वाचालितदीर्घिकाशीतलितां, परिपश्यन्, कस्यचित्पादपस्य मूल-माश्रित्य स्थितां ध्यानसंवीतहृदयां अनशनक्षामां कार्तयसंगूढस्तनो-दरीं एकवेणीधरां दुर्दिनान्तर्गतामिव चन्द्रलेखां आरक्षकराक्षसी-गणपरिवृतां कामपि विरहव्यथामिव मूर्तिमतीं वरवर्णिनीम-पश्यत्। "केयं भवेत्" इति क्षणं विचिकित्सन् स द्रागुपासीदन्तं परिजनकरावलम्बितदीपिकावलिद्योतितमार्गं निसर्गताम्रायताक्षं क्षणदाचरचक्रवर्तिनमुद्वीक्ष्य कोटरान्तरितो भूत्वा वृत्तान्तं जिज्ञासुरवतस्थे ॥

तदानीमतिवेलसम्भृतमन्मथोन्मथितहृदयः पौलस्त्यस्तां मानवतीमुपसृत्य बह्वनि प्रलोभनानि प्रस्तुवन्ननुकूलयितुं प्रायतत। शश्वन्निष्ठुरमधिक्षिप्य तृणवदवधीरितोऽपि तया, रामापवादगर्भि-तैरात्मश्लाघोपन्यासकुत्सितैर्दुःश्रवैर्वचोभिस्तां स निर्लज्जो निरन्तरं

तुतोद । अथ च क्रुद्धा सा पतिदेवता "ननु देवि" इति सचापलमुपासीदन्तं निर्दहन्तीव दृष्टिपातेन तं पापात्मानं "शप्तोऽसि" इत्यवाभर्त्सयत। अल्पैरप्येभिरक्षरैः प्रतिबद्धतेजा वज्राहत इव क्षुभ्यन् स रक्षःपतिः सद्यो निववृते ॥

अथ निर्गते रावणे, निद्रामुद्रिताक्षीषु च राक्षसीषु, कोटरादवरुह्य विदितवेदितव्यो मारुतिः सभक्त्युन्मेषं रघुवीरापदानानि गृणन् विनीतो देवीमुपससर्प । विविधशङ्काविकल्पेन प्रथममजातप्रत्ययापि रामपत्नी सुश्लिष्टभाषिणि, सन्निधापिताभिज्ञानाङ्गुलीयके तस्मिन् विमृश्य विश्वासमुपागमत् । तन्मुखेन च वियोगविधुरं, सुग्रीवसाहाय्येन प्रतिपन्नसमरधुरं राघवधुरन्धरमवगत्य समाश्वासितमानसा तमाशीर्भिरभिनन्द्य, भर्त्रे ग्राह्तयथोचितसन्देशं विससर्ज ॥

ततो हनूमान् निजागमनमन्तरेण रावणं विदितार्थं कर्तुमिच्छन् व्यञ्जयितुकामश्च हरिसेनावीरपराक्रमलवं परिबभञ्ज मन्दोदरीमानसोल्लासिनीमशोकवनिकाम् । तेन च मृणालवदुत्पाटितान् सालवृक्षान्, मुष्टिना भग्नं दारुपर्वतकं, पाणितलावमृदितानि लतागृहाणि,नादमात्रेण विसंज्ञीकृतान् प्रमदवनपालकांश्च दृष्ट्वा भीताः किङ्कारराक्षसा महाराजायापूर्वमिमं वृत्तान्तं निवेदयांचक्रुः । तच्छ्रुत्वा इदंप्रथमोपस्थितनिकारः संमूर्छत्क्रोधविकारः पिशिताशनेन्द्रः स वानरग्रहणाय किङ्कराणां सहस्रमाज्ञापयामास। ते तु हनुमता वृक्षैरेव निहत्य व्यापाद्यन्त । अनन्तरागतान् पञ्च-

सेनापतीन् काञ्चनतोरणपरिघेण घातयित्वा मारुतिर्मुष्टिनिष्पेषणेन कुमारमक्षमप्यक्षिणोत् । ततः सक्रोधं निर्गतेनेन्द्रजिता सह चिरं प्रयुद्धय स व्यपनीतयुयुत्साकण्डूतिर्निशाचरेन्द्रदर्शन-कौतूहलेन प्रबलास्त्रवर्षिणस्तस्य स्वेच्छया वश्यतामयासीत् । नीतोऽभूच्च पाशैर्बद्धो राज्ञः सन्निकर्षम् ॥

तत्र च, "सुरदानवैर्मनसाप्यचिन्त्यामिमां लङ्कां मामप्य-भिभूय प्रविष्टः किल वानरः । किमयं त्रैलोक्यविजयगर्वितेन कम्पितकैलासशैलेन दोर्मददुर्ललितेन मया अधिक्षिप्तस्य भगवतो नन्दिनः शापः कपिच्छद्मना मामिदानीमुपावृत्त" इति वितर्का-कुलहृदयं, मैथिलीप्रत्यर्पणमन्तरेण विच्छिन्नप्रार्थनोपक्रमेण विषण्णे-न भ्रात्रा विभीषणेन अन्वासितं, राक्षसराजमुपगम्य हनूमान् दूत-समुदाचारमङ्गीकृत्य कुशलमन्वयुङ्क्त । तेन च सावज्ञं "कस्त्वं शाखामृग" इति पृष्टः पवनसूनुः सुधीरं स्वगोत्रोपन्यासपूर्वक-मात्मानं रामदूतं वर्णयन्, विभीषणानुज्ञातो रामशासनमित्थ-मुदैरयेत् ॥

"वरशरणमुपैहि शङ्करं वा
प्रविश च दुर्गतमं रसातलं वा ।
शरवरपरिभिन्नसर्वगात्रं
यमसदनं प्रति यापयाम्यहं त्वाम् ॥" इति ।

तच्छ्रुत्वा सगर्वोपहासं प्रस्तुतनिजवीर्यापदानवर्णनं दशकण्ठं, सावहित्थमित्थमप्राक्षीन्मारुतिः, "एवंविधेन भवता किमर्थं तस्य

प्रच्छन्न दारापहरणं कृतम्" इति। तमनुमोदमानो राक्षसोऽप्य-राक्षससत्वो विभीषणो निरूपयामास—

"अपास्य मायया रामं त्वया राक्षसपुङ्गव।
भिक्षुवेषं समास्थाय छलेनापहृता हि सा" ॥ ९ ॥

इति। सद्यः क्रोधसंरक्तनयनं दृष्ट्वा तु भ्रातरं सानुनयमित्थं स पुनराचचक्षे—

"प्रसीद राजन् वचनं हितं मे
प्रदीयतां राघवधर्मपत्नी।
इदं कुलं राक्षसपुङ्गवेन
त्वया हि नेच्छामि विपद्यमानम्" ॥ १० ॥ इति।

अथ तदानीमप्यनुक्तग्राहिणं, स्ववीर्यावलेपमूर्च्छितं, "कथं लम्बसटः सिंहो मृगेण विनिपात्यते" इति कृतमुधाविकत्थनं प्रक्षीणपुण्यं रक्षःपतिं नामग्रहणेन निर्मर्यादं तथा बहु विनिनिन्द हनूमान् यथा प्रदीप्तक्रोधेन, "लाङ्गूलमदीप्य विसृज्यतामयं दूताधम" इति किङ्करानानुशासता तेन, "यदि तेऽस्ति धनुः-श्लाघा दीयतां मे रणो महान्" इति राघवाय ग्राहितसन्देशः स निरस्यत ॥

अनन्तरं भ्रातुरपरिहार्यया विप्रतिपत्त्याऽतिमात्रं निर्विण्णो विभीषणः पुनस्तमुद्बोधयामास—"राजन्नाप्तवचः किन्न शृणोषि। सीतापहरणेन न केवलमधर्मः, दुस्तरो बलवद्विग्रहश्चोपनिपातितः।

हन्त सर्वथा रक्षःकुलस्य विनाशोऽभ्यागत इति मन्ये" इति। किन्तु हितमनाद्रियमाणेन विपद्यमानभाग्येन दशग्रीवेण, क्रोधोद्वृत्तारुणविंशतिनयनमुद्वीक्ष्य, "शत्रुपक्षमाश्रितो निर्भयं मामभिभाषमाणो राक्षसाधमोऽयं सद्यो निर्वास्यताम्" इति धिक्कृतः स धर्मात्मा, "एवं प्रशासितोऽहमनपराद्धः स्वयमेव प्रयामि" इत्युक्त्वा रामपादमूलमाश्रिश्रयिषुः निर्जगाम ॥

उत्पत्य च गगनमार्गेण, वाराशिमुल्लङ्घ्य, प्रत्यागतहनूमदावेदितवृत्तान्तमावेलातटमागत्य पुरतो दुश्शकप्रसरत्वात् तत्रैवावस्थापितस्कन्धावारं वानरानीकपारावारमुपासदत्। राक्षसत्वादाशङ्कनीयशत्रुभावं समापतन्तमुद्वीक्ष्य तन्निग्रहार्थं कृतसम्भ्रमेषु वानरवीरेषु, विभीषणः सञ्जातप्रत्यभिज्ञं हनूमन्तमुपसृत्य, "मदागमनं देवाय निवेदय" इति पार्थयामास। स च हृष्टो राघवं व्यजिज्ञपत्—

"राजंस्त्वत्कारणादेव भ्रात्रा निर्विषयीकृतः।
विभीषणोऽयं धर्मात्मा शरणार्थमुपागतः" ॥ इति।

संश्रितवत्सलो दाशरथिर्लक्ष्मणेन तमानाय्य प्रतिनन्द्य च, "अद्य प्रभृति मद्वचनाल्लङ्केश्वरो भव" इत्यनुजग्राह ॥

दिष्ट्या विभीषणागमनेन कार्यसिद्धिमाशंसमानो रघुपतिस्तं, सागरतरणे कमुपायं पश्यसीत्यपृच्छत्। तेन च, "यदि स्वेनैव मार्गं न ददाति समुद्रो दिव्यमस्त्रं तावद्विसृष्टुमर्हति देव" इति

विज्ञापिते रामे तदनुतिष्ठति, जलमध्यात्सरभसं वरुणः स्वय-
मुदतिष्ठत् । तत्प्रसादेन क्षणाद्राधताभाजं सलिलनिधिं ससैनिक
उत्तीर्य रघुवीरो लङ्कासीम्नि सुवेलकटके कटकं स्थापयामास ॥

अथ क्रमान्निवेश्यमानासु सेनासु तत्तद्बृन्दपरिग्रहेषु परीक्ष्यमाणेषु, पुस्तकप्रामाण्यात्कुतश्चिदप्यविज्ञायमानौ द्वौ वनौकसौ गृहीतौ । विभीषणो निपुणं निरीक्ष्य, "राक्षसेशमन्त्रिणौ शुकसारणावेतौ रन्ध्रान्वेषिणौ" इति तयोर्याथातथ्यं विभावयामास । तौ च दयानिधी रामः पौलस्त्याय, "रणातिथिस्त्वां द्रष्टुमहमागत" इति ग्राहितसन्देशौ विमोचयामास ॥

अथ प्रावर्तत पुङ्खानुपुङ्खप्रहितनिरन्तरशरवर्षसंपादितो-
द्गाढदुर्दिनोदयानामाशराणां, निजभुजोत्पाटितानेकानोकहनिवह-
शैलशृङ्गोत्करमात्रप्रहरणानाञ्च वानरानीकानां निरवकाशीकृतगग-
नाभोगस्तुमुलः संपरायः । तत्र चोत्पुच्छकर्णवानरप्रवरगृहीतकण्ठ-
निष्पेषणोद्गलितनयनविकृतमुखरक्षोगाकीर्णं, क्रुद्धनक्तञ्चरकर-
परिभ्रमितकृपाणिकाशतसम्पातप्रविदीर्णोद्भटवानरभटं, प्रवहद-
सृक्पूरवाह्यमानविपन्नहरिरक्षःकुणपराशिबीभत्सं, पश्यतामनि-
मिषमनिमिषतां प्रतिभयतामवहत्समराजिरम् । तदानीमनपेक्षित-
बन्दीग्रहसाहसमप्सरोगणस्वयंवरणोत्सवसंपादकं वीरस्वर्गमापुर-
सङ्ख्याः सङ्घशे नैर्ऋतवीराः ॥

अथ विपद्यमानाभ्युदये राक्षसकुले, समरचकितासु पराङ्-
मुखतया पलायमानासु पृतनासु, निहतेषु प्रहस्तनिकुम्भकुम्भकर्ण-

प्रमुखेषु मुख्यपुरुषेषु, व्यपयान्त्याञ्च स्वस्मात् आवैश्रवणनिरासात् स्वायत्तीकृतायां विजयश्रियां, परित्रातव्यभूतनिजात्मापि सचिववचांस्यनपेक्ष्य दुर्व्यवस्थितनियतिपारतन्त्र्येण मुह्यन्, वीरमानी दशवदनो, मदनावेशदाहपरिध्वस्तमतिः सीतामृगतृष्णिकामेव भूयोऽन्वधावत्। मिथ्या तां मोहयिष्यन्स दुरात्मा, रामलक्ष्मणयोः शिरःप्रतिकृती आनाय्य, "अयि मुग्धे, अद्यापि किमनुबध्नासि, गतायुषि तापसहतके तस्मिन् भावम् । पश्येमे कुमारेणेन्द्रजिता हतयोस्तयोर्मानुषपोतयोः शिरसी" इति दर्शयन् दयितागमनवृत्तान्तश्रवणदरोच्छ्वसितं तस्याः पतिव्रताया मानसं निर्दयं निर्ममन्थ ॥

अत्रान्तरे रामेण निहतमिन्द्रजितमख्यात् संभ्रान्तः कोऽपि किङ्करः। तदाकर्णनव्यलीकपरिभूतो लङ्केश्वरस्तथा विव्यथे, यथा स स्वपरिजनानामप्यनुकम्पनीयो बभूव । विललाप च सन्तापविह्वलः—"किमिदानीमनर्थहेतुभूतया सीतया, त्रैलोक्यविजयेऽपि विफलया चपलया श्रिया च । किं भोः कृतान्तहतक ! सुतप्रणाशपरिदीने मयि अद्यापि कातरोऽसि। हा धिक् !

इदानीमपि निः स्नेहो वत्सेनेन्द्रजिता विना ।
कष्टं कठोरहृदयो जीवत्येष दशाननः ॥ १२ ॥" इति ।

विलपंश्च मूर्च्छितः पपात भूपृष्ठे ॥

तदनु स्वमभियुयुक्षमाणं रोषेणाभिपतन्तं राघवं किङ्करमुखाच्छ्रुत्वा स प्रज्वलितक्रोधो मूर्तिमानिव वीरो रसः, "क्वासि

क्कासि " इति समुद्यतासिः सहसोदतिष्ठत् । उत्थाय च, "रे रे क्षुद्रतापस, पश्यन्तु त्वामद्य निराशा गीर्वाणाः, वज्रीभकुम्भतट-पाटनकठोरधारस्यास्य कृपाणस्य क्रोधोपहारतां नीतम् " इति जगर्ज । पुनः सीतां निरूप्य, " आः, अस्याः कारणेन किलै-तावाननर्थः " इति तां हन्तुकामः परिपतन्नासन्नपरिजनेन यत्ना-न्निवारितः स पापात्मा सद्यः सूतोपनीतं स्यन्दनमास्थाय सङ्ग्रामा-वतरणत्वरया निर्ययौ ॥

ततस्त्रिलोकीजेगीयमानपरस्परवीरापदाननिकषायिते तस्मि-न्महति युद्धे, सरोषौत्सुक्यं निभृतं निरीक्षमाणेष्वुभयपक्षीयेषु, लीलयैव द्वेधाकृत्य प्रतिपक्षप्रहितां कालान्तकोपमां शक्तिं, तत्क्षण-मिन्द्रेणोपप्रेषितं रथमारूढेन, निरन्तरबाणवर्षावरुग्णारातिस्यन्दन-हयध्वजादिना, प्रलयसूर्यदुर्निरीक्षेण, अमोघवेधं वेधसो दिव्य-मस्त्रं प्रयुञ्जानेन, जिताशेषरथिना दशरथिना निकृत्तदशशिरः-पतनसमकालाभिवृष्टसुमनःसुमनोवृष्टिमेदुरमुत्सादितो रावणः । सद्यस्तद्वचनाद्विभीषणश्च लङ्कापतिर्बभूव ॥

एवं स्ववीर्यमहिम्ना निहत्य युधि त्रैलोक्यविद्रावणं रावणं, तदभिनिवेशिनश्च भीमकर्मणो रक्षोगणान्, अराक्षसवृत्तेर्विभीषण-स्याभिषेकेण कृतकृत्यो राघवः शत्रुकुलनिवासादनुभूतानल्पदुःखां सीतामाश्वासयितुकामस्तद्दर्शनमनुचिन्तयामास ॥

तदा विभीषणः प्रविश्य स्वयमेव कृतोपसर्पणां देवीं राघवाय न्यवेदयत् । रामस्तु जनापवादपरिजिहीर्षया प्रकटमित्थ-

माज्ञापयामास। "विभीषण, न मां द्रष्टुमर्हति रजनिचरावमर्श-जातकलङ्का, इक्ष्वाकुकुलकीर्तेः कालुष्यहेतुभूता जानकी। तत्रैव तावत्तिष्ठतु" इति। सीतापक्षपातेन प्रसादार्थीनि तन्निर्बन्ध-वचनानि च निर्दयमवधीरयामास॥

एवं धिक्कृतमात्मानं विज्ञाय मानवती जनकयजनसंभवा, विमुक्तजीवितप्रत्याशा, अग्निप्रवेशकृतनिश्चया भर्तुरनुज्ञां प्रति-पालयामास। अनुज्ञाता च तेन विकसितमुखी हंसीव पद्मवन-मनिर्विण्णा विभावसुमविक्षत्। तदानीमाश्चर्यमाश्चर्यमिति चित्रीय-माणे द्रष्टृलोके रामः सद्योजातानुशयो लक्ष्मणं सहसा तां साहसा-न्निवारयेत्यादिदेश। किन्त्वेतावतैव सा पतिदेवता, ज्वलनं प्रविष्टा शीतसुखस्पर्शमादधतस्तस्मात् कनकमालेव वर्धितप्रभा निर्विकारं निरमज्जत्। तां च स्वयमेव भगवान् हव्यवाहनः समादाय राघवान्तिकमभिवर्तमानो व्यजिज्ञपत्—

"इमां गृह्णीष्व राजेन्द्र सर्वलोकनमस्कृताम्।
अपापामक्षतां शुद्धां जानकीं पुरुषोत्तम॥ १३॥
इमां भगवतीं लक्ष्मीं जानीहि जनकात्मजाम्।
सा भवन्तमनुप्राप्ता मानुषीं तनुमास्थिता"॥ १४॥

इति। राघवः सप्रमोदं मैथिलीमङ्गीकृत्य, "अस्याः शुद्धिं जानतापि मया लोकप्रत्ययार्थमेव नैष्ठुर्यमित्थमाविष्कृतम्" इति वैश्वानर-माश्वासयामास॥

तदनु समग्रैस्सिद्धविद्याधरगन्धर्वाप्सरःप्रभृतिभिः देवैः विजयवाग्भिः गीतनृत्तादिभिः पुष्पवृष्ट्या चाभिनन्दितमङ्गलो, दशरथानुमत्या च तैरेवाभिषिक्तः पृथिवीराज्ये, सीतया सह पुष्पकमारुह्य सबन्धुमित्रो रघुपुङ्गवः साकेताभिमुखं प्रतस्थे। मध्येमार्गमवतीर्य जनस्थाने कुलपतिसपर्याकल्पितविश्रमो विचरितचरमाश्रमपदं सीतया सह सस्नेहानुस्मरणमनुभवन् स निर्वृतो यावदस्थात्, तावत् आसीताहरणोदन्तश्रवणात् अग्रजसाह्यार्थं समाहृतप्रभूतसेनासमुदयानुकर्षणमन्थरं प्रसरन्नुररीकृतलङ्काभियानो भरतस्तं देशमनुप्राप्तो भ्रात्रा समगच्छत ॥

तत्र च बन्धुजनाभिनन्दितः सीतापतिः कैकेयीवचनात् भरतप्रत्यर्पितां राज्यधुरामङ्गीकृत्य वसिष्ठवामदेवादिभिर्महर्षिभिः प्रकृतीः पुरस्कृत्य यथाविधि निर्वर्तिताभिषेकमङ्गळः पुष्पकेणैव सर्वैः समुपेतः साकेतमवाप । अथाधिवसन्निक्ष्वाकुराजधानीमप्रतिहतशासनः पावनापदानः स नक्तञ्चराभ्युदयधूमकेतुरापादितत्रिलोकीभद्रो रामभद्रः सुचिरं व्यलासीत् ॥

इति श्रीरामचरितम्।

इति श्रीमन्महालिङ्गकविकृतिषु भासकथासारे
द्वितीयो भागः सम्पूर्णः।

॥ समाप्तश्चायं पूर्वार्धः ॥

भासीयश्लोकानुक्रमणिका ॥

Index of Verses quoted from the Originals

(for Part II)

	Page.		Page.
अपास्य मायया रामम्	... ५५	यैस्तर्पितास्सुत	... ४८
इदानीमपि निःस्नेहो	... ५८	राजंस्त्वत्कारणादेव	... ५६
इमां गृह्णीष्व	... ६०	वनगमननिवृत्तिः	... ३८
इमां भगवतीं	... ६०	वरशरणमुपैहि	... ५४
गतो रामः प्रियं	... ४१	वागुराच्छन्नमाश्रित्य	... ५०
प्रसीद राजन्	... ५५	शुल्के विपणितं	... ३८
येन प्राणाश्च राज्यं च	... ४२	श्रद्धेयः स्वजनस्य	... ४५

OPINIONS ON THE KINKINIMALA.

(SELECT PORTIONS.)

1. "I congratulate you on their high literary merit .....I earnestly hope that it may be possible for you to continue the publication of your admirable poetic works."— FRANKLIN EDGERTON, *Yale University, Connecticut.* May 29, 1934.

2. "Attractive little book of graceful Sanskrit poems."—L. D. BARNETT, (*British Museum.*) London, 30 May, 1934.

3. "I admire the fluent and elegant Sanskrit of your poems. It is a pleasure to see how much Sanskrit is still a living language."— PROF. M. WINTERNITZ, *Prague University, Czechoslovakia.* 31—5—34.

4. "Your work is marked by felicity of expression, command of metre and skill in composition. Your translations, in my opinion, represent very creditably the originals and testify to the almost infinite capacity of Sanskrit to express human thought and emotion."-A. BERRIEDALE KEITH, *Edinburgh University.* 27 June, 34.

5. "I have much enjoyed them and I congratulate you on your success in reproducing the grace and charm of classical Sanskrit poetry."— E. J. RAPSON, *Cambridge University.* 16-6-34.

6. "I read the little volume with keen enjoyment."
—RT. HON. V. S. SRINIVASA SASTRI,

7. "I have read the book and admired many pieces in it for their genuine poetic flavour and for their charming style."— PROF. M. HIRIYANNA, *Mysore*.

8. "Writes with admirable ease and fluency..... Sanskrit poems which have a modern note."—
DIWAN BAHADUR K. S. RAMASWAMI SASTRI.

9. "The collection of poems here published is only a part of his lyrical effort. He has more to publish if he got the chance. His language is musical and generally familiar and easy, but occasionally beyond the depth of the average student. The verses run with surprising smoothness and give you an idea of the possibilities of the language in capable hands."—
MR. T. R. V. SASTRI, *In the Hindu Literary Supplement, May 15*, 34.

10. "The translations show a good deal of command over Sanskrit and have been carried out with care and in a spirit of fidelity to the original poems.....deserves the thanks of all lovers of classical poetry for this new venture."— THE AMRITA BAZAR PATRIKA, *Calcutta*. May 6, 34.

11. "Whether in the translations or in the original compositions, a high standard is maintained."—MR. V. R. R. DIKSHITAR, *Dharmarajya, Madras* April 21, 1934.

12. "A welcome indication of the life that pulsates in this "dead" language.....In some of these the author's close observation of Nature is evident. Some of the poems are translations of well-known passages in English and these have been very well done indeed ..... Wields great command over the language and writes in an easy flowing style. Some of the poems can be set to music ..... We eagerly await the publication of the other volumes in the series."—MR. A. B. GAJENDRAGADKAR, *In the Aryan Path, Bombay. Vol. No. 10, Oct. 1934.*

13. "A master of metre and melody."—THE ARDRA, JAFFNA. *Vol. III, Part I. January 1935.*

14. "This is almost the first attempt during recent times by an English educated scholar to produce a book of poems in Sanskrit possessing a modern flair and redolent with the taste and culture of English literature ..... has kept before his mind's eye the ideal of Kalidasa."—MR. K. BALASUBRAMANIA IYER, *In the Oriental Research Journal, Madras, 1934.*

15. "स्वकीयैः लघुभिरप्यलघु-समाधि-समुज्जृम्भितैः अभिनव-मनोहरैः पद्यगुम्फैः ..... आनन्दयति.....। पचेलिमः शब्द-सन्दर्भः, औचित्यानुसार्यर्थसङ्घटनं, ईषदलङ्कारोऽपि गुणभरितो रसभावातिरेकः प्रतिकाव्यमत्र सहृदयैश्चर्व्यमाणः नियतमावेद-यति शास्त्रिमहाशयस्य महाकवित्वापादयित्रीं प्रतिभां व्युत्पत्तिं च। .....प्रसादमाधुर्यश्लेषादिभिर्गुणगणैः पूर्वतनकविभ्यो लेश-तोऽप्यन्यून इतीयमुक्तिर्न वस्तुतत्वमतिवर्तते। नवरसभरितानि स्वभावोक्तिसुन्दराणि अष्टप्रासाद्यलंकृतानि उक्तिप्रत्युक्तिचणानि सुन्दरसुभाषितभूषितानि लघून्यपि बहूनि काव्यान्येकत्र समाहृत-वन्नयं कविग्रामणीः.....।"—PANDIT K. S. RAMASWAMI SASTRI, *Baroda, in the Udyana Patrika, Vol. VII, Parts 9 & 10, 1934.*

16. "सरसरमणीयतया सहृदयजनसंसेवनीयमिदं.....।"—THE SAMSKRITA SAHITYA PARISHAT, *Vol. XVII, No. 4, August 1934, Calcutta.*

17. "నేనెఱింగినవరకు సంస్కృతమున వెలువడిన ఖండకావ్య సంపుట రూపగ్రంథములలో నీ "కింకిణీమాల" యే మొదటిది.....శ్రీ మహాలింగ శాస్త్రిగారు సంస్కృతాంగ్లభాషా పారంగతులు. కావున భాషాద్వయ కవితారహస్యములను బాగుగ గుఱుతెఱిగి చాలయేండ్లనుండి తాము రచించిన ఖండకావ్యములను, తమ భాషాంతరీకరణములతోఁ బాటు, పర్చికూర్చి..... వెలువరించినారు.....శైలి మృదు మధురమై పండితజన రంజకమై యున్నది".—

B. V. RAMANAYYA, *in the "Bharati" Madras, June 31.*

KAUNDINYA PRAHASANA.

1. "Depicting a stratagem employed by a human 'parasite' to grab at the delicacies of a miser's table"—THE ARDRA, Jaffna.

2. "Its dramatic motive is of the slightest, but he has yet woven around it action and dialogue which are of a stimulatingly comic character." TRIVENI, Madras.

3. "The rare power of parody and burlesque which you display in the presenting of it..,... the dialogue sparkles with wit and the felicity and flow of the style are admirable"—MR. M. R. RAJAGOPALA AIYENGAR, Asst. Prof. of English, The Presidency College.

4. "I much appreciated the simplicity of its style and the naturalness of the sentiments expressed in it.—MR. M. HIRIYANNA, Mysore.

5. "..... command of Sanskrit, poetic fancy, literary taste and sense of melody.....also a keen sense of humour, rather unusual among Sanskrit authors.—SIR P. S. SIVASWAMI IYER.

6. न केवलं शब्दरचनायां न केवलमर्थघटनायां न केवलं विवक्षितार्थप्रतिपादनसमर्थपदप्रयोगे, अपि तु रसविशेषमङ्गिनं कृत्वा तत्र सर्वथा निहितदृष्टिः असंबन्धिलेशमप्यस्पृशन् समुचितालङ्कारविन्यासेनेष्टमर्थं झटित्याविर्भावयन् रूपकविशेषनिर्माणेऽपि

प्रगल्भते । ..... अस्य कवेः प्रतिभा संविधानशक्तिश्च कस्य सहृदयस्य नाह्लादाय भविष्यति ॥—The Udayana Patrika.

SAMBHU CARYOPADESA.

1. "The Sanskrit versification is at once smooth and charged with an eager eloquence"—THE HINDU Lit. Suppt.
2. "It shows all the grace and elegance which we have learnt to associate with your Sanskrit slokas."—MR. M. R. R. AIYENGAR.
3. "சுலோகங்கள் வெகு சுலபமானதும் அழகியதுமான நடையிலே உள்ளன.....பல பாதங்கள் மனதைக் கவர்கின்றன."—SWADESAMITRAN.
4. "A master of melodious and stately Sanskrit".—MR. K. S. RAMASWAMI SASTRI in the Foreword.
5. "Elegant in diction and elevated in substance."—THE ARDRA.
6. "भाषाया माधुर्येण उपदेशानां गुरुत्वेन भूमिकायाश्च गाम्भीर्येणातिमात्रं हृदयहारीदं पुस्तकं अवश्यमेव पठनीयं बालकैरस्मद्देशीयैः"—Samskrita Sahitya Parishat, Calcutta.

LAGHU RAMA CHARITAM (2nd Edn.)

"There could be no better introduction to Sanskrit poetry than the verse of Valmiki especially as found in this skilful abridgement"—HINDU Lit. Suppt.

WORKS BY MAHALINGA SASTRI.

1. KINKINIMALA. (First series) A collection of shorter poems about fifty in number including songs and translations from English literature: 1934.
Feather weight paper, cloth bound 2—0—0

Do. Paper cover ... 1—8—0

2. BHASAKATHASARA. (in three Parts).

a. Part I. Containing narrations in easy and fluent prose, of the Bhagavata and Bharata dramas of Bhasa, with summaries of the stories in English and glossary. 1934 Edition. ... 0—8—0

b. Part II Do. of the Ramayana dramas with summaries of the stories in English and glossary 1935 Edition ... 0—8—0

c. Part III Do. of the dramas based on traditional themes with summaries of the stories in English and useful grammatical notes. 1936 Edition. (Intermediate Text in the Madras University for 1936 and subsequent Examinations) 0—14—0

d. TRANSLATION AND NOTES with a critical Introduction, of the above Part III, for Intermediate students ... ... 0—12—0

3. KAUNDINYA PRAHASANAM. A farcical play in two Acts—with Preface and notes 0—8—0

4. SAMBHU CARYOPADESAM. A metrical translation in abridged form of Mr. K. S. Venkataramani's A Day with Sambhu, with a foreward by Diwan Bahadur K. S. Ramaswami Sastrigal 0—4—0

5. LAGHU RAMA CARITAM. An abridgement of the Valmiki Ramayana for young pupils. 2nd Edn. 0—6—0

6. KUMARASAMBHAVA of Kalidasa. Cantos 5, 6 and 7 prescribed for the Intermediate Examinations (Madras University) commencing from 1938, with Introduction, Translation, Notes etc. by Mahalinga Sastri.

CANDRALOKA Chapter V. Prescribed for B. A. Examinations commencing from 1938 with Introduction, Translation and Notes by Do. (to be shortly published.)

Apply to the Manager, SAHITYA CANDRA SALA, Madura.